International Journal of Sanskrit Research 2019; 5(5): 22-25

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(5): 22-25
© 2019 IJSR
www.anantaajournal.com
Received: 16-07-2019
Accepted: 20-08-2019

**सञ्जय-भट्टाचार्य्य**
गवेषक, गौडवङ्ग
विश्वविद्यालय, पश्चिम बंगाल, भारत।

Correspondence
**सञ्जय-भट्टाचार्य्य**
गवेषक, गौडवङ्ग
विश्वविद्यालय, पश्चिम बंगाल, भारत।

# आचार्ययोर्भामह-दण्डिनोर्दृष्टौ उपमालंकारविवेक

## सञ्जय-भट्टाचार्य्य

**सारांश**
भामह-दण्डिनावालंकारिकौ संस्कृतालंकारप्रस्थाने मुख्यौ आचार्यौ। तेन अलंकारस्वरूपं विवृण्वता अलंकाराणां भेदाः सोदाहरणं प्रपञ्चिताः। तत्र भामहमते, देशकालक्रियादिभिः विरुद्धेन उपमानेन सह उपमेयस्य गुणलेशेन यत् साम्यं सा उपमेति । उपमालंकारं पर्यालोच्य भामहेन एकवाक्यगतोपमानोपमेयभावस्य उदाहरणानि प्रदर्श्य नानावाक्यनिष्ठोपमानोपमेयभावं प्रतिपादयितुं प्रतिवस्तूपमानामकः उपमाभेदः लक्ष्यते । मेधावीरुद्रकथिताः सप्त उपमादोषाः उदाहरणलक्षणैः पृथक् वर्णिताः भामहाचार्येण।

अपरतः, दण्डिना काव्यादर्शे द्वितीये परिच्छेदे उपमालंकारं परिष्कुर्वता निगदितम् –
"यथाकथञ्चिद् सादृश्यं यत्रोद्भूतं प्रतीयते।
उपमा नाम सा तस्याः प्रपञ्चोऽयं निदर्श्यते"।। इति।
काव्यनिष्ठम् अलौकिकचमत्कारजनकं सादृश्यमुपमेति फलितम्। परं नोल्लेख्यं यच्चमत्कारजनकं सादृश्यं नोपमालंकारः। यथा – 'गौरिव गवय' इत्यत्र नोपमा। उपमायाः लक्षणं निरूप्य पुनः दण्डिनोपमायाः द्वात्रिंशद्भेदाः प्रदर्शिताः। उपमा निखिलालंकारमातृका। कविवंशस्य मातेति उपमा राजशेखरीयोक्तेरनुरूपमेव तात्पर्यमस्माकं चेतसि प्रतिभाति।

**मूल शब्द:** अलंकारः, दण्डी, भामहः, उपमा, धर्मोपमा चेति।

## प्रस्तावना

संस्कृतालंकारशास्त्रे विविधेषु सादृश्यमूलेष्बलंकारेष्वन्यतमा खलूपमा। सहृदयानां चित्तविनोदनकारिणी नटीरूपेणाख्यातोपमेयम् । अर्थात् काचिन्नटी रङ्गभूमौ विविधभूमिकामवलम्ब्य अभिनयं कुर्वन्ती यथैव सहृदय-हृदयमनुरञ्जयति, तथैवोपमा कविकर्मसु विविधालंकृतिरूपेण विवर्तमाना सहृदयानां हृदयाह्लादं वितनुते। अप्पयदीक्षितश्चित्रमीमांसायाम् उपमाप्रस्तावे उपमायाः विविधालङ्कारमूलत्वमाह -

"उपमैका शैलूषी सम्प्राप्ता चित्रभूमिकाभेदात्।
रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः"[1]।। इति

[1] चित्रमीमांसा, काशीसंस्कृतग्रन्थमाला (207), प्रथमं संस्करणम्, वि.सं, पृष्ठा-33

विचित्ररूपिणीमामुपमां प्राज्ञः आलंकरिका: अखिलकाव्यसौन्दर्यस्योत्सरूपेण स्वीकुर्वन्ति। कविकुलमातृस्वरूपोपमा खल्वलंकारोत्तमा । तस्माद्राजशेखरेणाप्युक्तम् –

"अलंकारशिरोरत्नं सर्वस्वं काव्यसम्पदाम् ।
उपमा कविवंशस्य मातैव मतिर्मम"[2]।। इति

आचार्यो भामहः ऐतिहासिकदृष्ट्या अलंकारप्रस्थानस्य प्रधानप्रवर्तकः । अस्य स्वकीयकृतौ काव्यालंकारे अलंकारः सर्वेषु काव्यतत्त्वेषु सर्वाधिकमहत्वपूर्णः। काव्यस्य नित्यधर्मस्तु अलंकारः, तदाभावे काव्यं न शोभते । काव्यस्य सौन्दर्यवर्धने शब्दार्थालंकारयोः उभययोः सामञ्जस्यस्य महत्त्वं प्रतिपादितम् तत्रभवता भामहेन। अनेनालंकारप्रास्थानिकेन काव्ये अलंकाराणां सर्वातिशायित्वं प्रकटितम् - "न कान्तमपि निर्भूषं विभाति वनिताननम् "[3] इति
उपमालंकारस्य लक्षणं प्रतिपादयता भामहाचार्येणोक्तम्-

"विरुद्धेनोपमानेन देशकालक्रियादिभिः।
उपमेयस्य यत् साम्यं गुणलेशेन सोपमा"[4]।। इति

अर्थात् देशकालक्रियादिभिः विरुद्धेन उपमानेन सह उपमेयस्य गुणलेशेन यत् साम्यं सा उपमेति विदुषां मतम्। देशकालक्रियादिभिः विरुद्धेनोपमानेन (चन्द्रादिना) उपमेयस्य औपम्यप्रतियोगिनः मुखादेः गुणलेशेन अर्थात् येन केनचित् धर्मेण यत् साम्यं अर्थात् यत् सादृशं सोपमा इति फलितः अर्थः। अस्यां कारिकायाम् उपमालंकारप्रयोजकेषु उपमानोपमेय- सामान्यधर्माश्च उक्ताः । किन्तु सामान्यधर्मप्रतीतिहेतवः शब्दा अपि उपेक्षिता इति उत्तरकारिकायां निर्दिशति यथेव शब्दौ इत्यादिना। पूर्णोपमायाः चतुरो धर्मान् उक्त्वा साम्यवाचकशब्दाभावे लुप्तोपमां प्रदर्शयति - "विना यथेवशब्दाभ्यां समासाभिहिता परा" इत्यादि कारिकाद्वारा।
अत्रेवम् अवधेयं यद् बहुव्रीहिप्रभृतिना इवादिविरहेऽपि उपमानोपमेयवृत्तिसादृश्यस्य उपमाप्रयोजकस्य अभिहितत्वात् यथा – 'कमलपत्राक्षी' इति एवं समासगा लुप्तोपमा प्रदर्शिता।

तदनन्तरं "वतिनापि क्रियासम्यं"[5] इति कारिकया तद्धितगा आर्थी पूर्णोपमा सोदाहरणमुच्यते। सा च क्रियासाम्ये तुल्यार्थे विहितस्य वतेरुपादाने सम्भवति। उदाहरणं यथा- "द्विजातिवदधीतेऽसौ गुरुवच्चानुशास्ति नः" [6] इति। अध्ययनक्रियानिमित्तकसाधर्म्यविवक्षायां तथा अनुशासनक्रियानिवन्धनमेव साम्यमिति गुरुशव्दान् उपमानवाचकात् तृतीयासमर्थात् तुल्यार्थे वतिर्विहितः। उपमालंकारं विवृण्वता भामहेन एकवाक्यगतोपमानोपमेयभावस्य उदाहरणानि प्रदर्श्य नानावाक्यनिष्ठोपमानोपमेयभावं प्रतिपादयितुं प्रतिवस्तूपमानामकः उपमाभेदः लक्ष्यते –

"समानवस्तुन्यासेन प्रतिवस्तूपमोच्यते।
यथेवानभिधानेऽपि गुणसाम्यप्रतीतितः।।"[7] इति

समानवस्तुनः वाक्यान्तरप्रतिपादितार्थस्य न्यासेन उपस्थापनेन प्रतिवस्तूपमा नाम उपमाभेद उच्यते। नानावाक्यत्वेन यथेवादीनां साम्यवाचिनां प्रयोगाभावेऽपि वाक्यार्थयोः गुणादिनिबन्धनसाम्यत्वप्रतीतिसद्भावात् प्रस्तुताप्रस्तुतयोः उपमानोपमेयभावावगतिः अर्थपर्यालोचनाबलाज्जायतेति उपमा, तत्रापि निर्वाद्धं विराजमाना भवति । अलङ्कारोऽयं विम्बप्रतिविम्बभावं गमयति यथा-

"कियन्तः सन्ति गुणिनः साधुसाधारणश्रियः।
स्वादुपाकफलानम्राः कियन्तौ वाऽध्वशाखिनः"[8]।। इति

तदनन्तरं निन्दाप्रशंसाचिख्यासोपमादिभेदात् उपमायास्त्रयो भेदाः पूर्वाचार्याणां कैश्चित् पृथक्तया परिगणिताः तदनुपपन्नमिति "सामान्यगुणनिर्देशात् त्रयमप्युदितं ननु"[9] इत्यादिना । मालोपमादयोऽपि उपमाया अवान्तरभेदा न पृथक् परिगणनीयाः विच्छित्तिविशेषाभावादिति भामहाचार्याणां मतम् ।
तदनन्तरं मेधावीरुद्रकथिताः सप्त उपमादोषाः उदाहरणलक्षणैः पृथक् वर्णिताः भामहाचार्येण । ते च दोषाः खलु हीनता, असम्भवः, लिङ्गभेदवचनभेदः, विपर्ययः, उपमानाधिकत्वम्, असदृशत्वञ्चेति । एते सप्त दोषाः सप्रपञ्चं सभेदं निरूपिताः उदाहृताश्च ।

---

[2] काव्यमीमांसा

[3] काव्यालंकारः (13/1)

[4] तत्रैव (30/2)

[5] काव्यालंकारः (33/2)

[6] तत्रैव (33/2)

[7] तत्रैव (34/2)

[8] काव्यालंकारः (36/2)

[9] तत्रैव (38/2)

काव्यादर्शाख्यालंकारग्रन्थस्य द्वितीये परिच्छेदे उपमालंकारं परिष्कुर्वता दण्डिना निगदितम्

" यथाकथञ्चिद् सादृश्यं यत्रोद्भूतं प्रतीयते ।
उपमा नाम सा तस्या: प्रपञ्चोऽयं निदर्श्यते"[10]।। इति

यत्र काव्ये गुण-क्रियाद्रव्यवशेन द्वयो: वस्त्व्योः (उपमानोपमेयोः) सादृशं साम्यं प्रतीयते अर्थात् अभिधा-लक्षणा-व्यञ्जनान्यतरवृत्त्या प्रतीयते, सोपमा नामालंकार:। काव्यनिष्ठम् अलौकिकचमत्कारजनकं सादृश्यमुपमेति फलितम्। परं नोल्लेख्यं यच्चमत्कारजनकं सादृश्यं नोपमालंकार:। यथा – 'गौरिव गवय' इत्यत्र नोपमा।

दण्डिना प्रोक्तस्य उपमालंकारस्य लक्षणे 'यथा कथञ्चित्' इति शब्देन येन केनापि धर्मेण गुणेन क्रिययान्येन वेत्यर्थः, यथा 'हंसीव धवला कीर्त्तिः' इत्यत्र धवलत्वगुणेन प्रस्तुतोपमेयं कीर्त्तिः, अप्रस्तुतोपमानस्य हंस्या: सादृश्यम्, सलीलमियमायाति वधूर्गजवधुरिव' इत्यस्मिन् स्थाने सलीलागमनक्रिययोपमेयोपमानयो: अर्थात् वध्वा सह गजवध्वाः सादृश्यं, 'आकाशः काशतेऽत्यर्थं शिववद्विधुभूषणः' इत्यादौ च विधुरूपद्रव्येण सादृश्यं, एवमन्यत्रापि बोध्यम्। लक्षणस्थितस्य सादृश्यशब्दस्यार्थः उपमानोपमेययो: एकधर्मवत्त्वम्, उद्भूतम् प्राधान्येन स्फुटं; तेन अस्फुट- सादृशमुलकात् रूपकालङ्कारात् उपमाया: भेदः सूचित: । अपि च, 'प्रतीयते' इति पदेन अभिधा-लक्षणा-व्यञ्जनान्यतरवृत्त्या उपमालङ्कारो भवतीत्यर्थः।

चत्वारि अङ्गान्युपमालङ्कारस्य। तानि तावत् उपमानम्, उपमेयम्, साधारणधर्म: उपमावाचकशब्दश्चेति। तत्र सादृश्यप्रतियोग्युपमानम्, सादृश्यानुयोग्युपमेयम्, उपमाने, उपमेये चोभयत्र संगतो धर्मः साधारणो धर्मः, उपमावाचक: इवादिशब्दश्चेति ।

उपमाया: लक्षणं निरूप्य पुनः दण्डिनोपमायाः द्वात्रिंशद्भेदाः प्रदर्शिताः। किन्तु धर्मोपमादीनामेतेषामलंकाराणां लक्षणानि तेन नोल्लिखितानि। केवलमुदाहरणयोगेन विविधानामुपमालङ्काराणां भेदास्तेन कृताः। तद्यथा - विविधेषूपमालंकारेषु धर्मोपमा दण्डिना सर्वादौ व्याख्याता। तेनोच्यते-

"अम्भोरुहमिवाताम्रं मुग्धेकरतलं तव
इति धर्मोपमा साक्षात् तुल्यधर्मप्रदर्शनात्"[11]।।

[10] काव्यादर्शः (14/2)

अत्र साधारणधर्मस्य आताम्रत्वस्य प्रथममुपमेयं भूतकरतलेनैवान्वयः, न तूपमानभूतेन अम्भोरुहेण, तस्य समस्तैकदेशपदबोध्यत्बात् तद्गतत्वेन प्रतीतिस्तु पर्यालोचनया अन्वयबोधोत्तरमेव, अतएव धर्मस्य साधारणत्वप्रतीतिः, तयैव च वैचित्र्यमिति प्रसङ्गादुक्तम् - इतीति। इति एवं साधारणधर्मप्रयोगस्थले, धर्मोपमेति । धर्मोपादानेनेयमुपमा इति कृत्वा धर्मोपमेत्यर्थः इति प्रेमचन्द्रशर्मणः।

दण्ड्याचार्यस्तु सम्यग्रूपेण प्राचीनमतं मतमेवानुसरति। धर्मवस्तूपमाविषये अग्निपुराणे दृश्यते-

"यत्र साधारणो धर्मः कथ्यते गम्यते अथवा।
ते धर्मवस्तुप्राधान्याद्धर्मवस्तूपमे उभे"[12] ।।

द्वात्रिंशत्प्रकारेषूपमालंकारेषु हेतूपमा सर्वान्ते आलोचिता तेन । आचार्येणोक्तम् –

"कान्त्या चन्द्रमसं धाम्ना सूर्यं धैर्य्येन चार्णवम्।
राजन्ननुकरोषीति सैषा हेतूपमा मता"[13] ।।

अस्मिन्नुदाहरणे कान्त्या देहप्रभया इन्दुमनुकरोषि, धाम्ना आदित्यमनुकरोषि, धैर्येन चार्णवमनुकरोषि इत्यत्र हेतूपमानामालंकारः। चन्द्राद्युपमानेन सह राजारूपोपमेयस्य साम्यं हेतुप्रदर्शनेन वैचित्र्यत्वादत्र हेतूपमा।

अतएव उपमा निखिलालंकारमातृका। कविवंशस्य मातेति उपमा राजशेखरीयोक्तेः अनुरूपमेव तात्पर्यमस्माकं चेतसि प्रतिभाति।

## परिशीलिता ग्रन्थानुक्रमणी


1. अग्निपुराणम् – श्रीपञ्चाननतर्करत्नः (सम्पा.), नवभारत पावलिशार्स, प्रथमसंस्करणम्, 1999.
2. काव्यप्रकाशः (मम्मटः) - षोड़श-टीकासमेतः – ड: ज्योत्स्नामोहनः (सम्पा.), नागप्रकाश, प्रथमसंस्करणम्, 1999.
3. काव्यप्रकाशः (मम्मटः) - (बालबोधिनीयुता वामनभट्टविरचिता) – भाण्डारकर-ओरियेन्टाल रिसार्च इनस्टीट्युट, पुणा, 1983.


[11] काव्यादर्शः (15/2)

[12] अग्निपुराणम् (10/344)

[13] काव्यादर्शः (50/2)

4. काव्यमीमांसा (राजशेखर-रचिता) - (सम्पा.) सि.डि. दालालः तथा आर. ए. शास्त्री, (संशोधिता परिवर्धिता च) के. एस. रामस्वामी श्वास्त्री शिरोमणिः, ओरियेण्टाल इन्सटिटिउट, बडोदा, 1934 (तृतीय संस्करणम्).
5. काव्यादर्शः (दण्डी) – (प्रेमचन्द्रतर्कवागीशकृतः मालिन्यप्रोञ्छनीटीकासमेतः) - (सम्पा.) चिन्मयीचट्टोपाध्यायः, पश्चिमवङ्गराज्यपुस्तकपर्षद्, कलिकाता, 1995.
6. काव्यादर्शः (दण्डी) – आचार्यः श्रीरामचन्द्रमिश्रः (व्याख्याकारः), चौखाम्वा विद्याभवन, वाराणसी, 1996.
7. काव्यालंकारः (भामहः) – वटुकनाथशर्मा वलदेव-उपाध्यायश्च (सम्पा.), चौखाम्वासंस्कृतसंस्थानम्, वाराणसी,1981(द्वितीयसंस्करणम्).
8. काव्यालंकारः (भामहः) – रमणकुमारशर्मा (सम्पा.), विद्यानिधि प्रकाशन, दिल्ली, 2008.
9. काव्यालंकार-सारसंग्रहः (उद्भटः) - लघुवृत्तिटीकासहितः – नारायणदासवाणहाट्टी (सम्पा.), प्रथमसंस्करणम्, पुना, 1925.
10. काव्यालंकारसूत्रवृत्तिः (वामनः)–श्रीकृष्णसूरिः (सम्पा.), श्रीवाणीविलास प्रेस, श्रीरङ्गम, 1909.
11. काव्यालंकारः (रुद्रटः) - श्रीनमिसाधुप्रणीतया संस्कृतटीकया समुपेतः, मोतीलाल बनारसीदास, वाराणसी, 1983.
12. रसगङ्गाधरः (जगन्नाथः) – श्रीपारसनाथद्विवेदी (सम्पा.), सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1998.
13. साहित्यदर्पणः (विश्वनाथः) – कुसुमप्रतिमाटीकोपेतः, हरिदाससिद्धान्तवागीशः (सम्पा.), कोलकाता, 1967 शकाब्दः (चतुर्थसंस्करणम्).